# पाठ-२८(अ)
# संस्कृतम् अन्याः भारतीयाः भाषाः च

**सारान्शः**

भाषा अस्माकं विचारविनिमयस्य सशक्तं साधनम् अस्ति। अस्याः मानवजीवनेन सह घनिष्ठः सम्बन्धः विद्यते । मानवः यन्मनसा ध्यायति तद्वाचा वदति। जानन्ति यदस्माकं विशाले भारतदेशे विभिन्नप्रान्तवासिनो जनाः स्वप्रान्तीयभाषाणां प्रयोगं कुर्वन्ति । असमवासिनः असमिया भाषां, बंगालवासिनः बाङ्लाभाषां, तमिलनाडुवासिनः तमिलभाषां, हिन्दीप्रदेशवासिनः हिन्दीभाषां भाषन्ते। इत्थम् अनेकासां भाषाणां भाषिणो जनाः अत्र निवसन्ति। संस्कृतम् भारतस्य सर्वासां भाषाणां जननी अस्ति ।भाषाविदां मते संसारे 2796 भाषाः सन्ति ।संस्कृतभाषा भारोपीयभाषासु गण्यते।संस्कृतम् विश्वस्य प्राचीनतमा आर्यभाषा अस्ति। संस्कृतस्य द्वे रूपे स्तः- वैदिकं लौकिकं च। संस्कृतस्य वैदिकं रूपं प्राचीनतमम् । तद्रूपं वयं ऋग्वेदे प्राप्नुमः ।संस्कृतस्य लौकिकं रूपं वाल्मीकिरामायणम् इति ग्रंथात् प्रारभते। लौकिकसंस्कृतम् प्रसिद्धेन वैयाकरणेन पाणिनिना व्याकरणनियमैः आबध्य नियंत्रितं कृतम्।

**पालि-प्राकृत-अपभ्रंशानाम् उद्भवः-**

अनन्तरं संस्कृतस्य आधारं गृहीत्वा पालिभाषा विकसिता सञ्जाता। बौद्धधर्मस्य ग्रन्थाः जातकग्रंथाः इति नाम्ना प्रसिद्धाः पालिभाषायां रचिताः आसन् । पालिभाषानन्तरम् प्राकृतभाषायाः उद्भवः सञ्जातः । अशोकस्य शिलालेखेषु प्राकृतभाषायाः प्रयोगः उपलभ्यते। प्राकृतभाषायाः प्रयोगः अश्वघोषस्य नाटकेषु प्राप्यते ।

**भारतीयसंविधाने संस्कृतस्य स्थानम्-**

संविधानस्य अष्टम- अनुसूच्यां सर्वकारेण द्वाविंशतिसंख्याकानां भाषाणां विभिन्नराज्येभ्यः परिगणनं विधाय मान्यता प्रदत्ता । ताः सन्ति एताः भाषाः असमिया, उड़िया, उर्दू, कन्नड, कश्मीरी, गुजराती, तमिल, तेलुगु, पंजाबी, बंगाली बोडो, मराठी, मलयालम, मैथिली, संस्कृतं, संथाली, सिंधी, हिन्दी, नेपाली, कोंकणी, मणिपुरी, डोगरी।

**वर्णानाम् उच्चारणम्-**

ध्वनीनाम् उच्चारणाय जिह्वया सह मुख्यरूपेण अष्ट अंगानि प्रयुज्यन्ते। तानि सन्ति हृदयं, कंठः, तालुः, मूर्धा, दन्ताः, जिह्वामूलम्, नासिका, ओष्ठौ ।

**प्रयत्नः-**

वर्णानाम् उच्चारणे मुखस्य अंगानां प्रयत्नः भवति । स प्रयत्नः द्विप्रकारेण क्रियते आभ्यन्तर (आन्तरिक) रूपेण, बाह्यरूपेण च ।

**अर्थस्तरे परिवर्तनम्-**

शब्दानाम् अर्थः सर्वदा समानः न भवति ।यथा- ग्रामीणः इति शब्दः ग्रामस्य वासी इत्यर्थं द्योतयति। शनैः शनैः अस्य अर्थः परिवर्तितो भूत्वा 'असंस्कृत' असभ्यः इति जातः ।
एतादृशाः बहवः शब्दाः सन्ति येषाम् अद्यत्वे भिन्नेऽर्थे प्रयोगः भवति । शब्दस्तरे अर्थपरिवर्तनं त्रिभिः प्रकारैः भवति ।
(i) अर्थविस्तारेण (ii) अर्थसंकोचेन (iii) अर्थादेशेन च।

**देवनागरी लिपिः-**

देवनागरी लिपेः वयं संस्कृतभाषायां हिन्दीभाषायां च प्रयोगं कुर्मः।

**आवश्यकोऽयं ज्ञानम्**

- भारतयोरोपीयभाषापरिवारे संस्कृतम् प्रमुखतमा भाषा ।
- संस्कृतम् शुद्धा, परिष्कृता च प्राचीनतमा आर्यभाषा अस्ति ।
- यदा प्राकृतभाषा व्याकरणस्य नियमेषु आबद्धा जाता तदा अपभ्रंशभाषायाः उद्भवः संजातः।
- अपभ्रंशभाषाभ्यः आधुनिकभारतीयभाषाणाम् उत्पत्तिः संजाता।
- भारतीयसंविधानस्य अष्टमअनुसूच्यां द्वाविंशतिसंख्याकाः मान्यताप्राप्ताः भाषाः सन्ति ।
- संगणकयंत्रस्य कृते संस्कृतम् अत्यन्तम् उपयुक्तम् अस्ति ।
- मुखस्य विभिन्नानि अंगानि वर्णानाम् उच्चारणस्थानानि भवन्ति ।
- वर्णानाम् उच्चारणे मुखस्य अंगानां प्रयत्नः भवति । प्रयत्नः द्विविधः भवति- आभ्यन्तरः बाह्यश्च ।
- भाषायां पदरचना द्विधा भवति- प्रातिपदिकेन सह सुप् प्रत्यययोगेन (बालकः) धातुना सह तिङ् प्रत्यययोगेन च (भवति)
- लिपेः भाषायाः च परस्परं घनिष्ठ संबंधः अस्ति ।
- लिपीनां विकासक्रमे प्रथमं चित्रात्मकलिपिः, भावसंकेतलिपिः, वर्णात्मकलिपिः, अक्षरात्मकलिपिः एतासां नामानि प्राप्यन्ते ।

- संगणकयंत्रस्य कृते इयम् आदर्शलिपिः ।

**योग्यतां वर्धयत**

**(क) साहित्यिकभाषा**

या भाषा पारस्परिकव्यवहारभाषायाः किंचिद् भिन्ना, कलात्मकशब्दैः अलंकारैश्च युक्ता भवति, सा साहित्यिकी भाषा मन्यते । साहित्यिकी भाषा पूर्णतः व्याकरणसम्मता भवति । अतः रचितसाहित्यग्रन्थस्य भाषा लोकव्यवहारभाषायाः प्रयोगरूपेण भिन्ना भवति ।

**(ख) भाषायाः ध्वनिपरिवर्तनम्-**

भवन्तः यदा अन्यस्मिन् राज्ये दूरतरस्थानं वा गच्छन्ति तदा तत्रत्यजनानां भाषायां परिवर्तनं पश्यन्ति। तेषां भाषणशैली, वाक्यानां कथनप्रकारम् सर्वम् अन्यदेव भवति । तत्र कारणं किम्? एतत् कदापि चिन्तितम्?

भाषायाः प्रयोक्ता मानवः, तस्य समाजश्च परिस्थितेः अनुसारं परिवर्तितो भवति। अनेन ा परिवर्तनेन सह तेन प्रयुक्ताः भाषाः अपि परिवर्तिताः भवन्ति। भाषायाः ध्वनयः अपि परिवर्तिताः भवन्ति। ध्वनिपरिवर्तनस्य प्रमुखानि कारणानि एतानि सन्ति।

**1.** स्थानस्य जलवायुप्रभावः ।

**2.** विदेशीशासकानाम् आक्रमणप्रभावः व्यापारिकसम्बन्धश्च ।

**3.** विदेशीसंस्कृतेः प्रभावः ।

**4**. वैज्ञानिक आविष्काराणां प्रभावः।

**5.** संस्कृतभाषायाः प्रभावः।

**6.** प्रयत्नलाधवः ।

**7.** अनुकरणे अपूर्णतायाः प्रभावः ।

**8.** सादृश्यप्रभावः ।

उपयुक्तकारणैः भाषायाः ध्वनिषु, अर्थेषु, रूपेषु, वाक्येषु च परिवर्तनम् भवति ।

**अधिकाङ्कानाम् अर्जनं कथं भवेत् ।**

- पाठस्य सम्यक् रूपेण अध्ययनं कृत्वा भावम् अवगच्छेत।
- पाठे आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात् ।
- अधिकाधिक अध्याये संदर्भित विषयाणां अध्ययनं कर्तव्यम्।

**स्व मूल्याङ्कनम् कुरुत**

- अध्यायस्य भावं स्व शब्दैः वर्णयत ।
- अध्याये आगतानां व्याकरण बिन्दुनां अभ्यासं कुरुत ।
- मूल पाठस्य अभ्यासं कुरुत।